[(1) RV S 5-51-11 to 15 – Kāñchī Pāṭhaḥa
(2) RV Khilam (Pariśhiṣhṭam)]

ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा , असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥ ११ ॥

ॐ svas’ti nōō mimītāmaśh’vinā bhagas’
svas’ti dēv’yadi-tiranar’vaṇa-ḥa ।
svas’ti pūṣhā , asu-rō dadhātu nas’
svas’tid’ dyāvāāpṛthivī su-chētunāā ॥ 11 ॥

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय , आदित्यासो भवन्तु नः ॥ १२ ॥

svas’tayēē vāyumupab’ bravāmahai sōmaṁ’ṁ’
svas’ti bhuva-nas’ya yas’pati-ḥi ।
bṛhas’patiṁ’ sar’va-gaṇaṁ’ svas’tayēēs’
svas’taya- , ādit’yāsōō bhavan’tu naḥa ॥ 12 ॥

विश्वे देवा नो , अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा , अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ १३ ॥

viśh’vēē dēvā nōō , ad’yās’ svas’tayēē
vaiśh’vānarō vasu-rag’nis’ svas’tayēē ।
dēvā , a-vant’vṛbhavas’ svas’tayēēs’
svas’ti nōō rud’ra[fp]’ pāt’vaṁ’ha-saḥa ॥ 13 ॥

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
svas’ti mit’rāvaruṇās’ svas’ti path’yē rēvati ।

www.Saiveda.net

स्वस्ति न , इन्द्रश्चाग्निश्च स्वस्ति नोँ , अदिते कृधि ॥ १४॥

svas'ti na , in'draśh'chāg'niśh'chas'
svas'ti nōō , aditē kṛdhi ॥ 14 ॥

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाँविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥ १५॥

svas'ti pan'thāmanu- charēma
sūr'yāchan'dramasāāviva ।
punar'dadatāgh'na-tā jānatā saṅ' ga-mēmahi ॥ 15 ॥ (1)

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवताँनाम् ।
असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवा रुहेम ॥ १ ॥

svas'tyaya-nan' tārk'ṣhyamariṣh'ṭanēmim'
mahad'bhūūtaṁ' vāyasan' dēvatāānām ।
asuragh'namin'dra-sakhaṁ' samat'su-
bṛhad'yaśhō nāva-mivā ru-hēma ॥ 1 ॥

अंहोमुचमाङ्गिरसं गयँ च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् ।
प्रयतपाणिः शरणं प्र पद्ये स्वस्ति सँबाधेष्वभयं नो , अस्तु ॥ २॥

aṁ'hōmucha-māṅ'gira-saṅ' gayañ'ñ' chas'
svas'tyāāt'rēyam' mana-sā cha tārk'ṣhyam'm ।
praya-tapāṇiśh' śharaṇam' pra pad'yēs' svas'ti
sam'm'bādhēṣh'vabha-yan' nō , as'tu ॥ 2 ॥ (2)

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥